च्छिद्रमस्यास्तीति । शुषि + "ऊषशुषिमुष्क-मधो रः ।" ५।२।१०७ । इति रः ।) विवरम् । वंशादिवाद्यम् । सरन्ध्रे, त्रि । इत्यमरः ॥ (आकाशः । इत्युज्ज्वलदत्तः । १ । ५२ ॥ )

शुषिरः, पुं, (शुषिर्विलमस्यास्तीति । शुषि + रः ।) मूषिकः । इति मेदिनी ॥ अग्निः । इति विश्वः ॥

शुषिरा, स्त्री, ( शुषिर + टाप् । ) नदी । इति धरणिः ॥ नलीनामगन्धद्रव्यम् । इत्यमरः ॥

शुषिलः, पुं, (शुष + "गुपादिभ्यः कित् ।"उणा० १ । ५७ । इति इलच् । स च कित् ।) वायुः । इत्युणादिकोषः ॥

शुष्कः, त्रि, (शुष शोषे + क्तः । यद्वा, "स्तृभ्रश्र-विमुषिभ्यः कक् ।" उणा० ३।४१। इति कक् । निष्ठे इः । शुक्ना इति भाषा । यथा,—
"शुष्कं पर्युषितं वापि नीतं वा दूरदेशतः ।
कुक्कुरस्य मुखाद्भ्रष्टं तदन्नं पावनं महत् ॥"
इति स्कान्दे उत्कलखण्डम् ॥

(निष्प्रयोजनम् । यथा, मनुः । ४ । १३९ ।
"शुष्कवैरं विवादञ्च न कुर्य्यात् केनचित् सह ॥")

शुष्कपत्रं, क्ली, (शुष्कं पत्रम् ।) खेहरहितदलम् । आतपादिशोषितपट्टशाकम् । नालिता इति शुक्ता इति च भाषा । तस्य गुणाः ।
"शुष्कपत्रं पयोमिश्रं पित्तघ्नं श्रमज्वरापहम् ॥
तत् शुष्कपत्रं जलदोषनाशनं
विशेषतः पित्तकफज्वरापहम् ।
जलञ्च तस्यापि च पित्तहारकं
सुरोचनं व्यञ्जनयोगकारकम् ॥"
इति राजवल्लभः ॥

शुष्कमत्स्यः, पुं, शुष्को मत्स्यः ।) आतपादिना निःस्नेहीकृतमीनः । शुक्टी माछ इति भाषा ॥ तस्य गुणा मत्स्यशब्दे द्रष्टव्याः ॥

शुष्कमांसं, क्ली, (शुष्कं मांसम् ।) आतपादिना निःस्नेहीकृतमांसम् । तत्पर्य्यायः । उत्तप्तम् २ वल्लूरम् ३ । इत्यमरः ॥ वल्लूरा ४ शुष्कनी ५ । इति तट्टीका ॥ अस्य गुणाः ।
"वृद्धानां दोषलं मांसं बालानां बलदं लघु ।
त्रिदोषकृद्व्यालदुष्टं शुष्कं शूलकरं गुरु ॥"
इति भावप्रकाशः ॥

शुष्करेवती, स्त्री, मातृकाविशेषः । यथा,—
"अस्थिभ्यश्च तथा काली सृष्टा पूर्व्वं महात्मना
तया तद्रुधिरं पीतमन्धकानां महात्मनाम् ।
या चास्मिन् कथिता लोके नामतः शुष्क-
रेवती ॥"
इति मत्स्यपुराणे १५४ अध्यायः ॥

शुष्कलः, त्रि, आमिषम् । इत्युणादिकोषः ॥ आमिषाशी ॥ इत्यमरटीकायां भरतः ॥

शुष्कली, स्त्री, शुष्कमांसम् । मांसमात्रम् । यथा,
"शुष्कली शुष्कमांसे स्यान्मांसमात्रेऽपि
दृश्यते ।"
इति शौष्कलशब्दटीकायां भरतः ॥

शुष्कहृचः, पुं, (शुष्को वृक्षः इव ।) धवहृक्षः । इति राजनिर्घण्टः ॥

शुष्कव्रणः, पुं, ( शुष्को व्रणः । ) किणः । इति त्रिकाण्डशेषः ॥

शुष्काङ्गः, पुं, (शुष्कं अङ्गं यस्य ।) धवहृक्षः । इति वैद्यकम् ॥ खे हशून्यावयवे, त्रि ॥

शुष्काङ्गी, स्त्री, (शुष्काणीव अङ्गानि यस्याः ।) गोधिका । इति शब्दचन्द्रिका ॥

शुष्कार्द्रं, क्ली, (शुष्कं आर्द्रम् ।) शुण्ठी । इति शब्दचन्द्रिका ॥

शुष्णः, पुं,(शुष्यत्यनेनेति । शुष + "हषिशुषिर-सिभ्यः कित् ।" उणा० ३।१२ । इति नः । स च कित् ।) सूर्य्यः । इत्युणादिकोषः ॥ अग्निः । इति संक्षिप्तसारोणादिवृत्तिः ॥ (बले, क्ली । इति निघण्टुः । २ । ९ ॥)

शुष्मं, क्ली, शुष्यत्यनेनेति । शुष शोषे + "अर्त्ति-स्तुसुहुसृधृक्षिक्षुभायावापदियक्षिनीभ्यो मन्" इति...

शुष्मं, क्ली, शुष्यत्यनेनेति । शुष शोषे + "षिवि-सिविसिशुषिभ्यः कित् ।" उणा० १ । १४३ । इति मन् । स च कित् ।) तेजः । इति मेदिनी ॥ पराक्रमः । इति हेमचन्द्रः ॥

शुष्मः, पुं, (शुष्यत्यनेनेति । शुष + मन् ।) सूर्य्यः । इति मेदिनी ॥ अग्निः । इति त्रिकाण्डशेषः ॥ वायुः । पक्षी । इति संक्षिप्तसारोणादिवृत्तिः ॥ बर्हिः । यथा । शुष्मोऽर्चिषि हुताशने । इति शुभाङ्कः । इत्यमरटीकायां भरतः ॥

शुष्म, [न्] क्ली,(शुष + मनिन् । संज्ञापूर्व्वकत्वात् न गुणः ।) तेजः । इति जटाधरः ॥ सौर्य्यम् । इति हेमचन्द्रः ॥

शुष्मा, [न्] पुं, (शुष्यत्यनेनेति । शुष शोषे + मनिन् ।) अग्निः । चित्रकवृक्षः । इत्यमरः ॥ अदन्तोऽपि शुष्मेति सर्व्वस्वम् । इति भरतः ॥

शूकः, पुं, क्ली, (शो तनूकरणे + "उलूकादयश्च ।" इति ऊकप्रत्ययेन साधुः । ) शस्यतीक्ष्णाग्रम् । शुँया इति भाषा । तत्पर्य्यायः । किंशारुः २ । इत्यमरः ॥ शूका ३ कोशी ४ । इति हेमचन्द्रः ॥ दया । इति मेदिनी ॥ सविषाल्पकुण्डभादिजल-मलोद्भवजन्तुः । शूकप्रधानलिङ्गवृद्धिकरयोगः । तद्विवरणं यथा । अथ शूकदोषाधिकारः । तत्र शूकदोषस्य निदानमाह ।
"अक्रमाच्छेफसो वृद्धिं योऽभिवाञ्छति मूढधीः
व्याधयस्तस्य जायन्ते दश चाष्टौ च शूकजाः ॥"
अक्रमात् अनुचितवृद्धिक्रमात् । अनुचिता च वृद्धिः भूरिविकारजनकस्य शूकस्य योगेन । शूकजाः । शूको जलशूकः सविषो जलजन्तु-विशेषः । स तु जलमलोद्भवः । अल्पकुम्भ इत्यादिकः । तथा शूकप्रधानो लिङ्गवृद्धिकरो वात्स्यायनाद्युक्तो योगः शूक उच्यते । यथा,
"भल्लातकास्थिजलशूकमथाब्जपत्र-
मन्तर्विदग्ध मतिमान् सह सैन्धवेन ।
एतद्विरूढवृहतीफलतोयपिष्ट-
मालेपितं महिषविड्विमलीकृताङ्गे ॥
स्थूलं भवद्धरतुरङ्गमलिङ्गतुल्यं
शेफः करोत्यभिमतं न हि संशयोऽस्ति ।"
इत्यादि । यत्तु जलशूकरहितमश्वगन्धादितैलं तदुचितमेव लिङ्गवर्द्धनम् ।

"अश्वगन्धा वरी कुष्ठं मांसी सिंहीफलान्वितम्
चतुर्गुणेन दुग्धेन तिलतैलं विपाचयेत् ।
तत्तैलं मेढ्रवक्षोजकर्णपालिविवर्द्धनम् ॥"
ते च शूकदोषा दश चाष्टौ च भवन्ति ॥*॥ तेष्वादौ सर्षपिकामाह ।
"गौरसर्षपसंस्थाना शूकदुर्भग्नहेतुका ।
पिड़िका श्लेष्मवाताभ्यां ज्ञेया सर्षपिका तु सा ॥"
शूकदुर्भग्नहेतुका शूकनिमित्ता दुष्टयोनि-निमित्ता च ॥ *॥ अष्ठीलिकामाह ।
"कठिना विषमैर्भुग्नैर्व्वायुनाष्ठीलिका भवेत् ।"
अष्ठीला लाहकारस्य भाण्डविशेषः । निहाइ इति लोके । तद्वत् कठिना इत्यष्ठीलिका । विषमैर्भुग्नैरिति वक्ष्यमाणशूकविशेषणम् । विष मैः स्वदीर्घैः । भुग्नैः वक्रैः ॥*॥ ग्रथितमाह ।
"शूकैर्य्यत् पूरितं शश्वत् ग्रथितं नाम तत् कफात्
यल्लिङ्गं सदा शूकैः पूरितं तद्ग्रथितत्वाद्ग्रथि तम् ॥*॥ कुम्भिकामाह ॥
"कुम्भिका रक्तपित्तोत्था जम्बुकास्थिनिभा
सिता ॥"
कुम्भिका कुम्भतुल्यफलत्वात् ॥*॥ अलजीमाह
"अलजी स्यात्तथा याद्दक् प्रमेहपिड़िकालजी ।
सा च रक्ता सिता स्फोटदारुणा कथिता च
सा ॥"
एषा रक्तपित्तनिमित्ता ज्ञेया ॥ * ॥ मृदिता-माह ।
"मृदितं पीड़ितं यत्तु संरब्धं वातकोपतः ।
पाणिभ्यां भृशसंभूढ़े संमूढ़पिड़िका भवेत् ॥"
शूकदोषे जाते पाणिभ्यां भृशसंमूढ़े पिच्चिते लिङ्गे अत्रापि वातकोपत इत्यनुवर्त्तते ॥ * ॥ अवमन्थमाह ।
"दीर्घा वाह्यश्च पिड़िका दीर्य्यते मध्यमस्तु याम्
सोऽवमन्थः कफासृग्भ्यां वेदना लोमहर्षकृत् ॥"
दीर्घा दीर्घाङ्कुराः ॥ * ॥ पुष्करिकामाह ।
"पिड़िका पिड़िकाव्याप्ता पित्तशोणितसम्भवा ।
पद्मकर्णिकसंस्थाना ज्ञेया पुष्करिकेति सा ॥"
पिड़िकाव्याप्ता क्षुद्रपिड़िकाव्याप्ता । अतएव पद्मकर्णिकसंस्थाना ॥*॥ स्पर्शहानिमाह ।
"स्पर्शहानिश्च जनयेच्छोणितं शूकदूषितम् ।"
अत्र स्पर्शासहत्वमेव लक्षणम् ॥*॥ उत्तमा-माह ।
"मुद्गमाषोपमा रक्ता रक्तपित्तोद्भवा च सा ।
एषोत्तमाख्या पिड़िका शूके जीर्णसमुद्भवा"*॥ शतपोनकमाह ।
"छिद्रैरणुमुखैर्लिङ्गं चिरं यस्य समन्ततः ।
वातशोणितजो व्याधिर्विज्ञेयः शतपोनकः ॥"
शतपोनकं चालनी तत्तुल्यत्वाच्छतपोनकः॥*॥ त्वक्पाकमाह ।
"वातपित्तकृते ज्ञेयस्त्वक्पाको ज्वरदाहकृत् ।"
एतस्य लिङ्गं त्वक्पाकलक्षणम् ॥*॥ शोणिता-र्व्वुदमाह ।
"कृष्णैः स्फोटैः सरक्ताभिः पिड़काभिः प्रपी
ड़ितम् ।